# Brahmakritam 12 Vishnu Stotram

# બ્રહ્મકૃતં ૧૨ વિષ્ણુસ્તોત્રમ્

## Document Information

Text title : Brahmakritam 12 Vishnu Stotram

File name : brahmakRRitaM12viShNustotram.itx

Category : vishhnu, vishnu, mahAbhArata, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | bhIShmaparva | adhyAya 61/42-70||

Latest update : November 2, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 2, 2025

*sanskritdocuments.org*

# બ્રહ્મકૃતં ૧૨ વિષ્ણુસ્તોત્રમ્

વિશ્વાવસુર્વિશ્વમૂર્તિર્વિશ્વેશો વિષ્વક્સેનો વિશ્વકર્મા વશી ચ ।
વિશ્વેશ્વરો વાસુદેવોઽસિ તસ્માદ્યોગાત્માનં દૈવતં ત્વામુપૈમિ ॥ ૪૨॥

જય વિશ્વ મહાદેવ જય લોકહિતે રત ।
જય યોગીશ્વર વિભો જય યોગપરાવર ॥ ૪૩॥

પદ્મગર્ભ વિશાલાક્ષ જય લોકેશ્વરેશ્વર ।
ભૂતભવ્યભવન્નાથ જય સૌમ્યાત્મજાત્મજ ॥ ૪૪॥

અસઙ્ખ્યેયગુણાજેય જય સર્વપરાયણ ।
નારાયણ સુદુષ્પાર જય શાર્ઙ્ગધનુર્ધર ॥ ૪૫॥

સર્વગુહ્યગુણોપેત વિશ્વમૂર્તે નિરામય ।
વિશ્વેશ્વર મહાબાહો જય લોકાર્થતત્પર ॥ ૪૬॥

મહોરગ વરાહાદ્ય હરિકેશ વિભો જય ।
હરિવાસ વિશામીશ વિશ્વાવાસામિતાવ્યય ॥ ૪૭॥

વ્યક્તાવ્યક્તામિતસ્થાન નિયતેન્દ્રિય સેન્દ્રિય ।
અસઙ્ખ્યેયાત્મભાવજ્ઞ જય ગમ્ભીર કામદ ॥ ૪૮॥

અનન્ત વિદિતપ્રજ્ઞ નિત્યં ભૂતવિભાવન ।
કૃતકાર્ય કૃતપ્રજ્ઞ ધર્મજ્ઞ વિજયાજય ॥ ૪૯॥

ગુહ્યાત્મન્સર્વભૂતાત્મન્સ્ફુટસમ્ભૂતસમ્ભવ ।
ભૂતાર્થતત્ત્વ લોકેશ જય ભૂતવિભાવન ॥ ૫૦॥

આત્મયોને મહાભાગ કલ્પસઙ્ક્ષેપતત્પર ।
ઉદ્ભાવન મનોદ્ભાવ જય બ્રહ્મજનપ્રિય ॥ ૫૧॥

નિસર્ગસર્ગાભિરત કામેશ પરમેશ્વર ।
અમૃતોદ્ભવ સદ્ભાવ યુગાગ્ને વિજયપ્રદ ॥ ૫૨॥

પ્રજાપતિપતે દેવ પદ્મનાભ મહાબલ ।
આત્મભૂત મહાભૂત કર્માત્મઞ્જય કર્મદ ॥ ૫૩॥

પાદૌ તવ ધરા દેવી દિશો બાહુર્દિવં શિરઃ ।
મૂર્તિસ્તેઽહં સુરાઃ કાયશ્ચન્દ્રાદિત્યૌ ચ ચક્ષુષી ॥ ૫૪॥

બલં તપશ્ચ સત્યં ચ ધર્મઃ કામાત્મજઃ પ્રભો ।
તેજોઽગ્નિઃ પવનઃ શ્વાસ આપસ્તે સ્વેદસમ્ભવાઃ ॥ ૫૫॥

અશ્વિનૌ શ્રવણૌ નિત્યં દેવી જિહ્વા સરસ્વતી ।
વેદાઃ સંસ્કારનિષ્ઠા હિ ત્વયીદં જગદાશ્રિતમ્ ॥ ૫૬॥

ન સઙ્ખ્યાં ન પરીમાણં ન તેજો ન પરાક્રમમ્ ।
ન બલં યોગયોગીશ જાનીમસ્તે ન સમ્ભવમ્ ॥ ૫૭॥

ત્વદ્ભક્તિનિરતા દેવ નિયમૈસ્ત્વાં સમાહિતાઃ ।
અર્ચયામઃ સદા વિષ્ણો પરમેશં મહેશ્વરમ્ ॥ ૫૮॥

ઋષયો દેવગન્ધર્વા યક્ષરાક્ષસપન્નગાઃ ।
પિશાચા માનુષાશ્ચૈવ મૃગપક્ષિસરીસૃપાઃ ॥ ૫૯॥

એવમાદિ મયા સૃષ્ટં પૃથિવ્યાં ત્વત્પ્રસાદજમ્ ।
પદ્મનાભ વિશાલાક્ષ કૃષ્ણ દુઃસ્વપ્નનાશન ॥ ૬૦॥

ત્વં ગતિઃ સર્વભૂતાનાં ત્વં નેતા ત્વં જગન્મુખમ્ ।
ત્વત્પ્રસાદેન દેવેશ સુખિનો વિબુધાઃ સદા ॥ ૬૧॥

પૃથિવી નિર્ભયા દેવ ત્વત્પ્રસાદાત્સદાભવત્ ।
તસ્માદ્ભવ વિશાલાક્ષ યદુવંશવિવર્ધનઃ ॥ ૬૨॥

ધર્મસંસ્થાપનાર્થાય દૈતેયાનાં વધાય ચ ।
જગતો ધારણાર્થાય વિજ્ઞાપ્યં કુરુ મે પ્રભો ॥ ૬૩॥

યદેતત્પરમં ગુહ્યં ત્વત્પ્રસાદમયં વિભો ।
વાસુદેવ તદેતત્તે મયોદ્ગીતં યથાતથમ્ ॥ ૬૪॥

સૃષ્ટ્વા સઙ્કર્ષણં દેવં સ્વયમાત્માનમાત્મના ।
કૃષ્ણ ત્વમાત્મનાસ્રાક્ષીઃ પ્રદ્યુમ્નં ચાત્મસમ્ભવમ્ ॥ ૬૫॥

પ્રદ્યુમ્નાચ્ચાનિરુદ્ધં ત્વં યં વિદુર્વિષ્ણુમવ્યયમ્ ।
અનિરુદ્ધોઽસૃજન્માં વૈ બ્રહ્માણં લોકધારિણમ્ ॥ ૬૬॥

વાસુદેવમયઃ સોઽહં ત્વયૈવાસ્મિ વિનિર્મિતઃ ।
વિભજ્ય ભાગશોઽઽત્માનં વ્રજ માનુષતાં વિભો ॥ ૬૭॥

તત્રાસુરવધં કૃત્વા સર્વલોકસુખાય વૈ ।
ધર્મં સ્થાપ્ય યશઃ પ્રાપ્ય યોગં પ્રાપ્સ્યસિ તત્ત્વતઃ ॥ ૬૮॥

ત્વાં હિ બ્રહ્મર્ષયો લોકે દેવાશ્ચામિતવિક્રમ ।
તૈસ્તૈશ્ચ નામભિર્ભક્તા ગાયન્તિ પરમાત્મકમ્ ॥ ૬૯॥

સ્થિતાશ્ચ સર્વે ત્વયિ ભૂતસઙ્ઘાઃ કૃત્વાઽઽશ્રયં ત્વાં વરદં સુબાહો ।
અનાદિમધ્યાન્તમપારયોગં લોકસ્ય સેતું પ્રવદન્તિ વિપ્રાઃ ॥ ૭૦॥

ઇતિ મહાભારતે ભીષ્મપર્વણિ ૩૩ અધ્યાયાન્તર્ગતં
બ્રહ્મકૃતં વિષ્ણુસ્તોત્રં સમ્પૂર્ણમ્ ।

મહાભારત । ભીષ્મપર્વ । અધ્યાય ૬૧/૪૨-૭૦॥

mahAbhArata . bhIShmaparva . adhyAya 61/42-70..

Proofread by PSA Easwaran

*Brahmakritam 12 Vishnu Stotram*

pdf was typeset on November 2, 2025

Please send corrections to *sanskrit@cheerful.com*